इति देवीमाहात्म्यम् ॥

अवलिप्तता, स्त्री, (अवलिप्त + तल् भावे ।) अहङ्कारः । इति हेमचन्द्रः ॥ ("तेजस्विन्यवलिप्तता मुखरता वक्तर्य्यशक्तिः स्थिरे"। इति नीतिशतके ।)

अवलीढ़ं, त्रि, (अव + लिह + क्त कर्म्मणि ।) भक्षितं । यथा मनुः,—
"पतत्रिणावलीढ़ञ्च शुना संस्पृष्टमेव च" ।
इत्यादि । "पतत्रिणावलीढ़ं काकादिना भक्षितं" । इत्याह्निकतत्त्वम् ॥

अवलीला, स्त्री, (अवरा लीला ।) हेला । अनायासः । यथा,—
"रतिज्ञं नूतनं प्राप्य विषतुल्यं पुरातनं ।
कान्तं दृष्ट्वा छिनत्त्येव सोपायेनावलीलया" ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २३ अध्यायः ।
अपिच ।
"शूलञ्च भ्रमणं कृत्वा पपात दानवोपरि ।
चकार भस्मसात्तञ्च सरथञ्चावलीलया" ॥
इति च तत्रैव प्रकृतिखण्डे १८ अध्यायः ॥

अवलुण्ठनं, क्ली, (अव + लुठि + भावे ल्युट् ।) लुण्ठनं । लोटा गड़ागड़ी इतिभाषा । अवपूर्ब्बकलुठधातोरनट्प्रत्ययेन निष्पन्नं ॥

अवलेपः, पुं, (अव + लिप + भावे घञ् ।) अहङ्कारः । ("दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्" इति मेघदूते ।) लेपनं । दूषणं । इति मेदिनी ॥ सङ्गः । इति त्रिकाण्डशेषः ॥

अवलेपनं, क्ली, (अव + लिप् + ल्युट् भावे ।) विलेपनं । म्रक्षणं । माखा इति भाषा । अवपूर्ब्बकलिपधातोरनट् प्रत्ययेन निष्पन्नं ॥

अवलेहः, पुं, (अवलिह्यते क्वाथादेः पुनः पाकात् घनीभूततया स्वाद्यते इति अव + लिह + कर्म्मणि घञ् ।) लेह्यौषधं । तस्य लक्षणं पर्य्यायश्च यथा,—
"क्वाथादेर्यत् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्चलेहश्च प्रोक्त इत्युच्यते बुधैः" ॥
("जिह्वालेह्यावलेहिका") इति च वैद्यकपरिभाषा । यथा,—
"कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी ।
श्लक्ष्णचूर्णीकृतं चैतन्मधुना सह लेहयेत् ॥
एषावलेहिका हन्ति सन्निपातं सुदारुणं ।
हिक्कां श्वासञ्च कासञ्च कण्ठरोगञ्च नाशयेत् ।
एतद्योज्यं कफोद्रेके चूर्णमार्द्रकजै रसैः" ।
तन्त्रान्तरे च उक्तं ।
"अष्टाङ्गं मधुना लिह्यादार्द्रकस्य रसेन वा ।
संमोहं दारुणं हन्यात्तन्द्राकाससमन्वितम्" इति ॥
"सर्व्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् ।
शीतोपचारि क्षौद्रं स्याच्छीतञ्चात्र विरुध्यते" ॥
अयमभिप्रायः । सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्व्वदा स्वेदो हित उक्तः । तत्राग्निसम्बन्धाद्देहस्योष्णता तिष्ठेदेव । उष्णेन मधुना विरोधः । उक्तञ्च सुश्रुतेन ।
"उष्णैर्विरुध्यते सर्व्वं विषान्वयतया मधु ।
उष्णार्त्तमुष्णैरुष्णञ्च तन्निहन्ति यथा विषं" इति ।
शीतोपचारि क्षौद्रमिति । शीतेनोपचारोऽस्यास्तीति शीतोपचारि । शीतञ्चात्र सन्निपाते विरुध्यते । अयमवलेहः प्रायेणोर्द्ध्वजत्रुजरोगहरत्वात् सायमुपयुज्यते । यत उक्तं चरकेण ।
"ऊर्द्ध्वजत्रुगदघ्नी या सा सायमवलेहिका ।
अधोरोगहरी या सा भोजनात्प्राक् प्रयुज्यते" ।
पौष्करं पुष्करमूलं तदलाभे कुष्ठं देयं ॥
शृङ्गी कर्कटशृङ्गी । व्योषं शुण्ठीपिप्पलीमरिचानि च । यासो यवासः । केचित् यासस्थाने यवानीं प्रक्षिपन्ति । कारवी मगरेला इति लोके । अष्टाङ्गावलेहिका ॥*॥
"छिन्नमामलकं पिष्ट्वा द्राक्षया सह मेलयेत् ।
विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥
तेनास्य शाम्यति श्वासः कासो मूर्च्छारुचिस्तथा" ॥
इत्यवलेहः ॥*॥ अन्यत् यथा,—
"पिप्पली त्रिफलाञ्चापि समभागां ज्वरी लिहन् ।
मधुना सर्पिषा वापि कासी श्वासी सुखी भवेत् ॥
कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः" ॥
चातुर्भद्रिका ॥*॥
"कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यान्मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्द्दिश्लेष्मानिलनिवृत्तये" ॥
अष्टाङ्गावलेहः । इति भावप्रकाशः ॥
("क्वाथस्य स्यात् पुनः पाकात् घनत्वं सारसक्रिया ।
सोऽवलेहश्च लेहः स्यात् तन्मात्रा स्यात्पलोन्मिता ।
सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः ।
द्रवं चतुर्गुणं दद्यादिति सर्व्वत्र निश्चयः ॥
सुपक्वे तन्तुमत्त्वं स्यादवलेहेऽप्सु मज्जनं ।
स्थिरत्वं पीड़िते मुद्रा गन्धवर्णरसोद्भवः ॥
दुग्धमिक्षुरसं यूषं पञ्चमूलकषायकं ।
वासाक्वाथं यथायोग्यमनुपानं प्रशस्यते ॥*॥
तदुदाहरणं । यथा,—
"कण्टकारीतुलां नीर-द्रोणे पक्त्वा कषायकं ।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकं ॥
भार्गी रास्ना शठी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्याद्घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधु पलाष्टकं ।
चतुष्पलं तु गोक्षीर्य्यां पिप्पलीनां चतुष्पलं ॥
क्षिप्त्वा निदध्यात् सुदृढ़े मृन्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिश्वासकासानशेषतः ॥*॥
कण्टकार्य्यवलेहः ॥*॥ इति च शार्ङ्गधरः ॥)

अवलेहनं, क्ली, (अव + लिह् + भावे ल्युट् ।) लेहनं । जिह्वाद्वारा स्वादनं । चाटन् इति भाषा । अवलेहः । अवपूर्व्वलिहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नं ॥

अवलोकनं, क्ली, (अव + लुक् + ल्युट् भावे ।) दर्शनं । आलोकनं । इति हेमचन्द्रः ॥
("जलवेलावलोकनकुतूहली" ।
इति नागानन्दे ।)

अवलोकितः, पुं, (अव + लोक + भावे क्त ततोऽस्त्यर्थे अच् ।) लोकनाथः । बुद्धः । इति विश्वमेदिन्यौ ॥

अवलोकितं, त्रि, (अव + लोक + कर्म्मणि क्त ।) निरीक्षितं । दृष्टं । इति विश्वमेदिन्यौ । (भावे क्त ।) प्रेक्षणक्रियायां, क्ली ॥

अवल्गुजः, पुं, (अवल्गोरशोभनाज्जायते इति अवल्गु + जन् + ड ।) सोमराजी । इत्यमरः ॥ कृष्णवर्णसोमराजी । हाकुच् यस्य प्रसिद्धिः । तस्य गुणाः । वायु-कफ-कुष्ठ-त्वग्दोष-नाशित्वं । इति राजवल्लभः । अस्य विवरणं वाकुची शब्दे द्रष्टव्यं ॥
("अवल्गुजाद्बीजकर्षं पीत्वा कोष्णेन वारिणा
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठप्रणाशनम्" ॥
इति वैद्यकचक्रपाणिसङ्ग्रहः ॥)

अववादः, पुं, (अव + वद + घञ् ।) आज्ञा । निन्दा । विश्वासः । इति मेदिनी ॥

अवशः, त्रि, (न विद्यते वशमायत्तत्वं यस्य ।) अवशीभूतः । विवशः ।
यथा,—
"श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यञ्च क्रिया कार्य्या विधानतः" ॥
इति शुद्धितत्त्वं ॥ (क्लीं, अवश्यं । निश्चितम् ।)

अवशक्थिकः, त्रि, (अवबद्धे शक्थिनी येन ।) वस्त्रादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्ब्बकोपविष्टः । फाँड़बान्धिया वसा इति भाषा । यथा । कात्यायनः ।
"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावशक्थिको यस्तु प्रौढ़पादः स उच्यते" ॥
आसनारूढ़पादः आसनारूढ़पादतलः । जानुनोर्जङ्घयोः कृतावशक्थिको वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । इत्याह्निकतत्त्वं ॥

अवशिष्टः, त्रि, (अवशिष्यते इति अव + शिष + क्त ।) शेषः । उद्वर्त्तः । अवशेषाश्रयः । यथा,—
"वल्मीकमूषिकोत्खातां मृदमन्तर्ज्जलां तथा ।
शौचावशिष्टां गेहाच्च नादद्यात् लेपसम्भवां" ॥
इत्याह्निकतत्त्वं ॥

अवश्यं, अ, (न वश्यं ।) निश्चयः । तत्पर्य्यायः । नूनं २ । निश्चितं ३ । इत्यमरः ॥
("अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुतं हविः" । इति मनुः ॥) (न + वश + यत् ।) अनायत्ते त्रि ॥

अवश्या, स्त्री, (अव + श्यै + ड । पृषोदरादित्वात् ह्रस्वः ।) कुज्झटिका । इति शब्दरत्नावली ॥ (कुज्झटिकाशब्देऽस्य विशेषो ज्ञेयः ।)

अवश्यायः, पुं, (अवश्यायते शैत्यमापद्यते इति श्यैङ् गतौ + श्याद्व्यधेति णः । ततो आतो युगिति युक् ।) हिमं । इत्यमरः ॥
("अवश्यायनिपातेन किञ्चित्प्रक्लिन्नशाद्वला" । इति रामायणे ।) गर्व्वः । इति विश्वप्रकाशः ।

अवष्कयणी, स्त्री, वष्कयनी । चिरप्रसूता गौः । इत्यमरटीकायां सारसुन्दरी ॥

अवष्टब्धं, त्रि, (अवष्टभ्यते स्म, ष्टभि स्तम्भे स्तम्भु-